॥ श्री ॥

अथ श्री त्रिविक्रमपंडिताचार्यसुत श्री नारायणपंडिताचार्यविरचित:

॥ श्री मध्वविजय: ॥

३. तृतीय: सर्ग:

अथ कदाचन सुंदरनंदनस्मितमुखेंदुदृशां दयितौ नृणाम् ।
महमतो निजबंधुमुदे मुदा प्रययतु: स्वजनै: सह दंपती ॥ ३.१ ॥
स्वजनतापगमागमसंगमप्रतिसभाजितपूर्वकसंभ्रमे ।
अविदुषी जननीति स बालक: शरणतो रणतो निरगान्नभि: ॥ ३.२ ॥
क्व नु यियाससि तात न सांप्रतं स्वजनसंत्यजनं तव सांप्रतम् ।
इति विभु: पथिकैरुदितो व्रजन् स्मितमनाकुलमुत्तरमातनोत् ॥ ३.३ ॥
त्वरितमेत्य स काननदेवतासदनमत्र ननाम रमापतिम् ।
अपि तत: प्रगतो लघु नाळिकेयुपपदांतरसद्मगतं च तम् ॥ ३.४ ॥
नळिननाभनिभालनसंमदागमविकस्वरभास्वरलोचन:।
जनमनोनयनांबुजभास्करो रजतपीठपुरं प्रययावसौ ॥ ३.५ ॥
सुहयमेधगणातिशयालवो हरिनमस्कृतय: सुकृता इमा:
इति सुरैरपि भूसुरमंडलै: समनमत् स सविस्मयमीक्षित: ॥ ३.६ ॥
न हि हरिं सततं न नमत्यसौ न च न पश्यति नापि न वंदते ।
अपि तथेति विधाय विशेषत: स ननु साधुजनान् समशिक्षयत् ॥ ३.७ ॥
अनवलोक्य सुतं सुतवत्सलो मृगयते स्म महीसुरपुंगव: ।
मुहुरपृच्छदमुष्य गतिं नरान् पथि पथि प्रगतोनुपदं द्रुतम् ॥ ३.८ ॥
जनसदागतिसूचितवर्त्मना प्रतिपदं व्रजता परया तृषा ।
द्विजमहामधुपेन मनोहरं स्मितमलाभि सुताननवारिजम् ॥ ३.९ ॥
विरहदूनतयोद्गमनोन्मुखं न्यरुणदश्रु पुरा स ययोर्दृशो: ।
अथ तयो: प्रमदोत्थितमप्यद: प्रतिनिरुद्ध्य गिरं गुरुरब्रवीत् ॥ ३.१० ॥
अयि सुतेदमुदाहर तत्वतो ननु समागतवानसि सांप्रतम् ।
स्वजनतारहितस्य तु कोऽत्र ते सहचरोऽर्भक दीर्घतमे पथि ॥ ३.११ ॥
जनकवाचमिमामवधारयन् कळमुदाहरदंबुरुहेक्षण: ।
स्वपदमाव्रजतो व्रजतोऽप्यतो ननु सखा मम काननगो विभु: ॥ ३.१२ ॥
तदितरायतनात्तु यदाऽगमं कृतरति: खलु तत्र हरि: सखा
अहमिहापि महेंद्रदिगालयं प्रणतवानुत यावदधीश्वरम् ॥ ३.१३ ॥
अपि ततोऽहमुपेत्य सहामुना भगवतेऽत्र सते प्रणतिं व्यधाम् ।

इति निगद्य विभाति शिशुः स्म विस्मितसभाजनचीर्णसभाजनः ॥ ३.१४ ॥
विरहितस्वजनं चरणप्रियं विविधभूतभयंकरवर्त्मनि ।
अयि कृपालय पालय बालकं लघुशुभस्य ममेत्यनमद् द्विजः ॥ ३.१५ ॥
तमुपगृह्य सुतं सुतपोनिधिः गृहमसौ गृहिणीसहितो ययौ ।
उदयतीति हि बालदिवाकरे स्मितमभूत् सुजनाननवारिजम् ॥ ३.१६ ॥
वरविमानगिरावपि चंडिका शिशुमहो जननी तमलाळयत् ।
अपरथा परितुष्टमनाः कथं चिरमिहैष वसेद् विसहायकः ॥ ३.१७ ॥
सकलशब्दमयी च सरस्वती सततमानमति स्वयमेव यम् ।
द्विजवरोऽथ कदाचन मातृकाः किल सुतं परिचाययति स्मतम् ॥ ३.१८ ॥
लिपिकुलं ननु तात गते दिने लिखितमेव पुनर्लिखितं कुतः ।
इति निजप्रतिभागुणभावितं हरिपदस्य वचस्तमनंदयत् ॥ ३.१९ ॥
शिशुरसौ प्रतिभांबुधिरित्यलं जनमनोवचनग्रहपीडना ।
न भवतादिति तं विजनस्थले स्वतनयं समशिक्षयदेषकः ॥ ३.२० ॥
महवता स्वजनेन समीरितस्वजननीसहितेन कदाचन ।
रुचिरवाचनयाऽर्चितवाक्छ्रिया प्रतियये प्रभुणा घृतवल्ल्यपि ॥ ३.२१ ॥
परिषदा नितरां परिवारितः शिवपदः किल धौतपटोद्भवः ।
इह कथां कथयन् ददृशे ततः पृथुधिया पृथुकाकृतिनाऽमुना ॥ ३.२२ ॥
इदमुवाच विचारविचक्षणः शुचि वचः शनकैः स जनांतरे ।
अपरथा कथितं कथक त्वया ननु मतान्महतामिति सस्मितम् ॥ ३.२३ ॥
अगणयन्न शिवं जनता तदा सवचने वसुदेवसुताह्वये ।
मुखरमिच्छति को मृगधूर्तकं प्रकृत हुंकृत सिंह शिशौ सति ॥ ३.२४ ॥
अथ कथं कथयेति तदा जने गदितवत्युचितार्थमुदाहरन् ।
स समलाळयत विस्मयीभिर्नरैः अपि सुरैर्विजयांकुरपूजकैः ॥ ३.२५ ॥
स जननीसहितो जनकं गृहे प्रगतवांस्तमुदंतमवेदयत् ।
निगद तात शिवः कथकः स किं वितथगीरथवाऽहमितीरयन् ॥ ३.२६ ॥
ननु सुतावितथं कथितं त्वयेत्यमुमुदीर्य सविस्मयमस्मरत् ।
प्रकृतितः कृतिता खलु मे शिशोः मदधिनाथदयोदयजेत्यसौ ॥ ३.२७ ॥
कथयतां प्रथमे कथयत्यलं स्वजनके जनसंघवृते कथाम् ।
सकललोकमनोनयनोत्सवः चतुरधीः स कदाचिदवाचयत् ॥ ३.२८ ॥
विविधशाखिपदार्थनिवेदने लिकुचनाम्नी तदाऽनुदितार्थके ।
किमिति तात तदर्थमवर्णयन् कथयसीति शनैरयमब्रवीत् ॥ ३.२९ ॥

अवदतीति पितर्यपि चोदिते प्रतिबुभुत्सुषु तत्र जनेष्वपि
अयमुदीर्य तदर्थमवाप्तवान् परिषदो ह्यसमानसुमाननाम् ॥ ३.३० ॥
बहुविधैश्चरितैरिति चारुभिः सकललोककुतूहलकारिणम् ।
द्विजवरेण वयस्युचिते स्थितं तमुपनेतुमनेन दधे मनः ॥ ३.३१ ॥
समुचितग्रहयोगगुणान्वितं समवधार्य मुहूर्तमदूषणम् ।
प्रणयबंधुरबांधववानसौ द्विजकुलाकुलमुत्सवमातनोत् ॥ ३.३२ ॥
विविधवेदतया विजिहीर्षवो वदनरंगपदेस्य चिराय याः ।
सुरवरप्रमदा अपि सप्रिया अभिननंदुरहो वियतो महम् ॥ ३.३३ ॥
विहितसाधनसाधितसत्क्रियोज्वलनमुज्ज्वलधीर्ज्वलयन्नयम् ।
उपनिनाय सुतं सुकुमारकं कुशलिनं कुशलीकृतशीर्षकम् ॥ ३.३४ ॥
परिचराग्निगुरू चरितव्रतः सुचरणः पठ साधु सदागमान् ।
इति गुरोस्त्रिजगद्गुरुशिक्षणे स्फुटमहासि सुरैः कृतसाक्षिभिः ॥ ३.३५ ॥
जितकुमारगुणं सुकुमारकं निजकुमारमवेक्ष्य निरंतरम् ।
समुचिताचरणे चतुरं स्वतः क्षितिसुरो मुदमायत शिक्षयन् ॥ ३.३६ ॥
सपटखंडमकिंचनवत् क्वचित् स्वविभवानुचितं चरणादिकम् ।
भुवनभर्तुरहो स्वनिगूहनं सुरसभासु कुतूहलमातनोत् ॥ ३.३७ ॥
अविरळैर्गरळोष्मभिराकुली कृतसमस्तजनो विचचार यः ।
क्वचिदमुं निजघांसुरशांतिमानुपससर्प स सर्प मयोऽसुरः ॥ ३.३८ ॥
त्वरितमुद्यतविस्तृतमस्तकः प्रतिददंश यदैनमविक्षतम् ।
प्रभुपदारुणचारुतरांगुलीविहतिपिष्टतनुः प्रतताम सः ॥ ३.३९ ॥
गरुडतुंडमिव प्रतिपन्नवान् द्विजकुमारपदं स ममार च ।
समुचितं चरितं महतामिदं सुमनसो मनसेष्टमपूजयन् ॥ ३.४० ॥
गिरिशगुर्वमरेंद्रमुखैश्च यच्चरणरेणुरधारि सुरेश्वरैः ।
क्षितिसुरांघ्र्यभिवंदनपूर्वकं स विदधेऽध्ययनं छलमानुषः ॥ ३.४१ ॥
करतळे खलु कंदुकवत् सदा सकलया कलया सह विद्यया ।
अरिधरेण समं स्फुरितं गुरोः मनसि तस्य विडंबयतो जनान् ॥ ३.४२ ॥
अनधिकैरधिकैश्च वयस्यथो बहुभिरध्ययनोपरमांतरे ।
अनिकटे वटुभिः पटुभिर्गुरोः स विजहार सुखी सखिभिः समम् ॥ ३.४३ ॥
पदमुदीर्य जवेन यियासितं द्रुतसखिष्टभवत् स पुरस्सरः ।
अयमयत्नतयेति न विस्मयो ननु मनोजवजित् पवनोऽसकौ ॥ ३.४४ ॥
प्लवनतेजसि हंत न केवलं विजितवान् स तदा सकलान् जनान् ।

प्रभुनिदेशकरो हनुमत् तनौ ननु जिगाय स वालिसुतादिकान् ॥ ३.४५ ॥
जलविहारपराजयिभिः स्पृधा सखिभिरीरितवारिपरिश्रितम् ।
वदनमाकुललोचनमादधे स्मितममुष्य हि कंचन विभ्रमम् ॥ ३.४६ ॥
स शनकैर्बलिनो युगपद्गतान् प्रविहृतेषु सखीन् निरपातयत् ।
अशनकैर्युगपत् प्रकृताहवान् सहसितो द्विजसूनुरयत्नवान् ॥ ३.४७ ॥
ग्रहण निग्रहणे ग्रहणे दृढे गुरुभरोद्धरणादिविधौ पटौ ।
इह विभावुपचारधिया नृणां ऋतमयं ननु भीम इतीरितम् ॥ ३.४८ ॥
विहरतीति पठत्यपि न स्फुटं स्वगृहगामिनि चाद्भुतमायति ।
परितुतोष न तत्र जगद्गुरौ स किल पूगवनान्वयजो द्विजः ॥ ३.४९ ॥
अथ कदाचन सोऽध्ययनांतरे तमवदत् कुपितोऽन्यमनस्विनम् ।
पठसि नो शठ ते सखिभिः समं किमिति नित्यमुदासितधीरिति ॥ ३.५० ॥
गुणनिका चरणादिकगोचरा न मम हृद्यितेत्युदितेऽमुना ।
वद विशारदवाद यथेप्सितं त्वमुपरीत्यवदद्धरणीसुरः ॥ ३.५१ ॥
सकललक्षणशिक्षणमूलभूः श्रुतिसमामननं स्खलनोज्झितम् ।
न खलु केवलमस्य गुरोर्व्यधात् सुमनसामपि तत्र कुतूहलम् ॥ ३.५२ ॥
प्रियवयस्यशिरोगुरुवेदनां अशमयत् सहजामपि दुस्सहाम् ।
स विपिने विजने मुखवायुना श्रवण गोचरितेन कदाचन ॥ ३.५३ ॥
अधिगतोपनिषच्च सकृच्छ्रुता प्रकटभागवतीति न विस्मयः ।
अधिगता ननु जात्वपि न श्रुताः प्रतिभया श्रुतयः शतशोऽमुना ॥ ३.५४ ॥
साक्षादथोपनिषदो विभुरैतरेय्याः
पाठच्छलेन विजनेऽर्थरसं ब्रुवाणः ।
अध्यापकाय विततार विमोक्षबीजं
गोविंदभक्तिमुचितां गुरुदक्षिणां सः ॥ ३.५५ ॥
अयि स्वामिन् दुष्टान् दमयदमय स्पष्टमुचिराद्
गुणान् गूढान् विष्णोः कथयकथय स्वान् प्रमदयन् ।
तदाऽऽनंदं तन्वन्निति सुमनसां सोऽनुसरता
मनुज्ञामादत्त त्रिभुवनगुरुर्ब्राह्मणगुरोः ॥ ३.५६ ॥
॥ इति श्रीमत्कविकुलतिलक त्रिविक्रमपंडिताचार्यसुत
नारायणपंडिताचार्यविरचिते श्रीमध्वविजये
आनंदांकिते तृतीयः सर्गः ॥